# ॥ श्रीरामद्वादशनामस्तोत्रम् ॥

प्रथमं श्रीकरं विद्यात् द्वितीयं दाशरथ्यकम् ।
तृतीयं रामचन्द्रं च चतुर्थं रावणान्तकम् ॥ १ ॥

पञ्चमं लोकपूज्यं च षष्ठकं जानकीप्रियम् ।
सप्तमं वासुदेवं च राघवेन्द्रं तथाऽष्टकम् ॥ २ ॥

नवमं पुण्डरीकाक्षं दशमं लक्ष्मणाग्रजम् ।
एकादशं च गोविन्दं द्वादशं सेतुबन्धनम् ॥ ३ ॥

एतद्द्वादशनामानि त्रिकाले यः पठेन्नरः ।
दारिद्र्यदोषनिर्मुक्तो धनधान्यसमृद्धिमान् ॥ ४ ॥

जनवश्यं राजवश्यं सर्वकार्यफलं लभेत् ।
अर्धरात्रे जपेन्नित्यं सर्वदुःखविनाशवान् ॥ ५ ॥

॥ इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे
श्रीरामद्वादशनामस्तोत्रम् ॥